योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १५८

अष्टपञ्चाशदधिकशततमः सर्गः १५८

मुनिरुवाच ।
एतत्ते कथितं सर्वं भविष्यद्भूतवत्तव ।
यथेच्छसि तथेदानीं व्याध साधु विधीयताम् ।। १
अग्निरुवाच ।
इति तस्य वचः श्रुत्वा विस्मयाकुलचेतनः ।
क्षीणं स्थित्वा जगामाशु स्नातुं व्याधस्तथा मुनिः ।। २
इति तौ चेरतुस्तत्र तपः शास्त्रविचारणैः ।
अकारणसुहृद्भूतावुभौ व्याधमहामुनी ।। ३
अथाल्पेनैव कालेन मुनिर्निर्वाणमाययौ ।
देहं त्यक्त्वाऽपदेशान्ते परे परिणतिं गतः ।। ४
कालेन बहुनान्येन ततो युगशतात्मना ।
व्याधस्य कामनां दातुं पद्मजन्मा समाययौ ।। ५
व्याधः स्ववासनावेशं निवारयितुमक्षमः ।
जानन्नपि वरं पूर्वं वर्णितं समयाचत ।। ६
ब्रह्मैवमस्त्विति प्रोच्य ययावभिमतां दिशम् ।
व्याधस्तपःफलं भोक्तुं खगवद्व्योम पुप्लुवे ।। ७
वर्धमानेन देहेन जगत्पारे महानभः ।
वेगादगणितं कालं पूरयामास शैलवत् ।। ८
महागरुडवेगेन तिर्यगूर्ध्वमधस्तथा ।
व्योम पूरयतस्तस्य कालो बहुतरो ययौ ।। ९
अथ दीर्घेण कालेन यदा विद्याभ्रमस्य सः ।
अन्तं न समवाप्नोति तत्रोद्वेगमुपाययौ ।। 6.2.158.१०
उद्वेगादथ बद्ध्वासौ प्राणरेचनधारणाम् ।

प्राणांस्तत्याज नभसि शवीभूतमधोवपुः ।। ११
चित्तं प्राणान्वितं व्योम्नि ययौ तत्रैव सिन्धुताम् ।
विदूरथारिरूपां तामखिलावनिपालिनीम् ।। १२
देहो मेरुशताकारमहाशव इवाभवत् ।
द्वितीयोर्वीनिभो व्योम्नः पपाताशनिवज्रवत् ।। १३
पिधानमिव कस्योर्वीवीथी कस्मिंश्चिदम्बरे ।
केशोण्ड्रकवदाभाते कस्मिंश्चिज्जागते भ्रमे ।। १४
आकारपूरिताशेषवसुधाचलमण्डलः ।
विपश्चिच्छ्रेष्ठ कथितमेतत्ते तन्महाशवम् ।। १५
यस्मिञ्छवं संपतितं जगत्यवनिमण्डले ।।
तदिदं जगदाभातमस्माकं स्वप्नपूर्यथा ।। १६
तदेतच्छवमास्वाद्य शुष्का पूर्णा महोदरी ।
संपन्ना चण्डिका देवी रक्ता रक्तान्त्रपूरिता ।। १७
मेदिनी मेदिनी जाता शवस्यैतस्य मेदसा ।
पूरिताऽपूर्वरूपेण हिमवद्गिरिरूपिणा ।। १८ ।
तदैवैतन्महामेदो मृद्धातुत्वमुपागतम् ।
कालेन वसुधा भूयो भूत्वा मृन्मयतां गता ।। १९
भूयः प्रजातानि वनानि भूमौ
ग्रामाः कृताः पत्तनसंयुताश्च ।
पातालतः साधुसमुत्थितास्ते
शैलाः प्रवृत्ता व्यवहारलक्ष्मीः ।। 6.2.158.२०
इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० अवि० विय० ? शवनिर्णयो नामाष्टपञ्चाशदधिकशततमः सर्गः ।।१५८।।